Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# भट्टनागेशरीत्या लक्षणातत्त्वविमर्शः

**विदुषी बोल्ला**
सहायकाचार्य्या, व्याकरणविभागः,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरालम्, गुजरातम्।



**Article Info**
Volume 3, Issue 5
Page Number: 29-37
Publication Issue :
September-October-2020

**शोध आलेख सार**

वृत्तिस्त्रिधा शक्तिलक्षणाव्यञ्जनाश्च। अत्र साहित्यिकाः, नैयायिकाः, मीमांसकाः, वेदान्तिनश्च लक्षणां स्वीकुर्वन्ति, किन्तु वैयाकरणैः लक्षणा न स्वीक्रियते। एतैस्तु ‘शक्यतावच्छेदकारोप एव लक्षणा’ इति मन्यते। शक्यावच्छेदकारोप इत्यत्र शक्यः अर्थात् शक्त्या उपस्थापितः अर्थः, शक्यता शक्ये तिष्ठति, तस्याः अवच्छेदकः गङ्गात्वकाकत्वादिः, तस्याऽऽरोपः एव लक्षणा । यथा तीरे गङ्गात्वारोपः, दध्युपघातकमात्रे च काकत्वारोपः। तेन च तीरादीनां गङ्गादिना बोधो जायते। एवञ्च शक्त्या एव लक्ष्यार्थबोधसत्त्वे तदर्थं पुनः अतिरिक्ततया लक्षणावृत्तेः स्वीकारः अनावश्यक एव। एवञ्च लक्षणायाः अभावे भाष्यप्रामाण्यात्, गौरवात्, अन्याय्यत्वाच्च वृत्त्यान्यतमत्वेन लक्षणा न स्वीकरणीया। अस्याः अभावे भाष्यप्रामाण्यन्तु ‘सति तात्पर्य्ये सर्वे सर्वार्थवाचकाः’ इति वचनम्, अनेन लक्षणाभावेऽपि गङ्गापदेन तीरबोधो जायते । अत्र ‘सति तात्पर्य्ये’ इत्युक्तत्वात् वक्तुः तात्पर्य्ये सत्येव तदर्थः बुद्ध्यते, तस्मात् सर्वैः शब्दैः निखिलार्थाः न ज्ञायन्ते । अत्र भट्टपादस्तु शक्तेर्द्वैविध्यं मत्वा लक्षणायाः खण्डनं प्रदर्शितम् । तथा च शक्तिर्द्विधा प्रसिद्धाऽप्रसिद्धा च। तत्र मन्दान् आरभ्य तीक्ष्णं यावत् सर्वेषां बुद्धिद्वारा यस्यां शक्तौ वेद्यात्वं भवति, सा प्रसिद्धा शक्तिः, एवं सहृदयानां प्रशस्तमानसां बुद्ध्या एव वेद्यात्वं यत्र शक्तौ, सा अप्रसिद्धा शक्तिरिति कथ्यते । अस्याः लक्षणायाः मूलन्तु ‘तात्पर्यानुपपत्तिप्रतिसन्धानमे’व। अन्वयानुपपत्तिप्रतिसन्धानस्य बीजत्वे तु ‘गङ्गायां घोषः’ इत्यादौ गङ्गापदार्थादेः तीराद्यर्थेष्विव घोषादिपदार्थादेः मकराद्यर्थेषु लक्षणापत्तिः स्यात्, एतादृश लक्षणयाऽपि अन्वयानुपपत्तेः परिहारसम्भवात्।

**मुख्य शब्द** – भट्टनागेशः, साहित्यिकाः, नैयायिकाः, मीमांसकाः,व्याकरणम्, लक्षणा।

**Article History**
Accepted : 10 Sep 2020
Published : 23 Sep 2020

सर्वतन्त्रस्वतन्त्रेण नागेशेन वैयाकरणसिद्धान्तप्रतिपादिका नानादर्शनदर्शितमतमतान्तरखण्डनमण्डनपूर्वकं ‘परे तु’ इत्यनेन स्वमतप्रख्यापिका ‘मञ्जूषात्रयी’ व्यरचि । तस्या एवान्यतमा परमलघुमञ्जूषा शक्तिलक्षणानिरूपणादिचतुर्दश-प्रकरणघटिता सर्वत्रैवाध्ययनाध्यापनविषयत्वेन संसेव्यते ।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तत्र तावदादौ शाब्दबोधाय कार्य्यकारणभावं ‘तद्धर्म्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति तद्धर्म्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः, वैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्य-स्वाश्रयपदविषयकत्वोभयसम्बन्धेनेति’ प्रदर्श्य, अत्र कारणत्वेनोपस्थितवृत्तेः स्वरूपं प्रतिपादनावसरे लक्षणायाः स्वरूपं, तद्भेदाः, तद्विषयकमतमतान्तराणि, प्रमाणपूर्वकं तत्खण्डनञ्च विहितम् । मयाऽत्र लक्षणां बिन्दुशः विभज्य सङ्क्षेपरूपेण मञ्जूषानुगुणं प्रतिपाद्यते । बिन्दवस्तु –

**1. लक्षणायाः प्रस्तावना**

- (1.1) तार्किकमते लक्षणा
  - (1.1.1) परिशीलनम्
- (1.2) मीमांसकमते लक्षणा
- (1.3) शाब्दिकमते लक्षणा

**2. लक्षणाबीजम्**

- (2.1) तार्किकसम्मतम्
- (2.2) मीमांसकमतम्
- (2.3) शाब्दिकमतम्

**3. लक्षणाभेदाः तदुदाहरणानि च**

- (3.1) परिशीलनम्

**4. लक्षणायाः निमित्तानि**

**5. मञ्जूषाकारदिशा लक्षणायाः खण्डनम्**

**6. निष्कर्षः**

## 1. लक्षणायाः प्रस्तावना

शाब्दबोधरूपे कार्य्ये वृत्तिज्ञानं कारणम् । वृत्तिश्च पदपदार्थसम्बन्धरूपा, सा च त्रिधा शक्तिलक्षणाव्यञ्जनारूपा च । अत्र साहित्यिकैः, नैयायिकैः, मीमांसकैः, वेदान्तिभिश्च लक्षणावृत्तिः मन्यते । किन्तु वैयाकरणैः शक्त्यतिरिक्तवृत्तिरूपा लक्षणा न स्वीक्रियते ।

### (1.1) तार्किकमते लक्षणा

नैयायिकमते लक्षणा ‘स्वशक्यसम्बन्धो’ वर्त्तते । अत्र स्वपदेन शक्तं पदं गृह्यते । शक्यः अर्थात् शक्त्या उपस्थापितः अर्थः। तथाहि पदशक्त्या उपस्थापितस्य अर्थस्य यः सादृश्यसामीप्यादिसम्बन्धः सः सम्बन्ध एव लक्षणापदार्थः। यथा गङ्गायां घोषः इत्यत्र शक्तपदं = गङ्गापदम्, गङ्गापदशक्त्या उपस्थापितः अर्थः = भगीरथरथखातावच्छिन्नजलप्रवाहः, न च तत्राऽऽभीरपल्ली जलप्रवाहे स्थातुं शक्नोति । अतः वक्तुः तात्पर्य्योपपत्तये जलप्रवाहे तत्सम्बद्धे तीरे चेत्यनयोः लक्षणा = सामीप्यसम्बन्धः स्वीक्रियते । तया लक्षणया (सम्बन्धेन) च सम्बद्धस्य बोधात् शैत्यपावनत्वादिविशिष्टतीरवृत्तिः घोषः इत्याकारकबोधः।

### (1.1.1) परिशीलनम्

लक्षणायामलङ्कारिकाणां नैयायिकानाञ्च बोधे कश्चिद्भेदो वर्त्तते –

- अलङ्कारिकाः[1] – शक्यतावच्छेदकप्रकारको बोधः।
- नैयायिकाः – लक्ष्यतावच्छेदकप्रकारको बोधः।

[1] मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥ इति का॰ द्वितीयोल्लासे नवमकारिका ।

'जाता लता हि शैले जातु लतायां न जायते शैलः।
सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्' ॥

अत्र कनकलातायाम् अर्थात् नायिकायाम्, गिरिद्वयम् अर्थात् स्तनद्वयम् । आलङ्कारिकाः शक्यतावच्छेदक-लतात्वरूपेण नायिकाबोधं स्वीकुर्वन्ति, यतो लतात्वप्रकारकबोधे एव चमत्कारो, न तु स्त्रीत्वप्रकारकबोधे । नैयायिकास्तु लताया लक्ष्यः = स्त्रीविशेषः, तत्र या लक्ष्यता, तस्या अवच्छेदकं स्त्रीत्वम्, तादृशस्त्रीत्वरूपलक्ष्यतावच्छेदक-प्रकारकबोधमामन्ति ।

**वस्तुतस्तु** क्वचित् लक्षणायां शक्यतावच्छेदकप्रकारकबोधः, क्वचिच्च लक्ष्यतावच्छेदकप्रकारकबोध उचितः। यथा –

'कचतस्त्रस्यति वदनं वदनात् कुचमण्डलं त्रस्यति ।
मध्याद् बिभेति नयनं नयनादधरः समुद्विजति' ॥

अत्र कचस्य (केशस्य) राहौ, वदनस्य (मुखस्य) चन्द्रे, कुचमण्डलस्य चक्रवाके, मध्यभागस्य सिंहे, नयनस्य हरिणे, अधरस्य च प्रवाले (सद्योजातपल्लवे) लक्षणा । एवञ्चात्र शक्यतावच्छेदककचत्वादिना लक्ष्यस्य राह्वादेः प्रतीतिः न तथा त्रासविशेषोत्पादिका, यथा लक्ष्यतावच्छेदकराहुत्वचन्द्रत्वादिना रूपेण प्रतीतिः त्रासजनिका ।

**(1.2) मीमांसकमते लक्षणा**

नैयायिकमतेन शक्यसम्बन्धो लक्षणा इति स्वीकारे शक्त्याः पदे विद्यमानत्वात्[2] पदे एव लक्षणा सम्भवति, न तु वाक्ये, तत्र शक्तेः अभावात् । अतः 'गभीरायां नद्यां घोषः' इत्यादिस्थले गभीरायां नद्याम् इत्यादिखण्डवाक्यानां गम्भीरनदीतीराद्यर्थे लक्षणायै लक्षणान्तरं वक्ति – 'स्वबोध्यसम्बन्धो लक्षणा' इति । अत्र स्वपदेन वाक्यं पदं वा गृह्यते, तस्य यः बोध्यः = बोधविषयः ज्ञाप्यः अर्थः, तस्य सम्बन्धः एव लक्षणा । यथा गभीरायां नद्यां घोषः इत्यत्र स्वम् = गम्भीरायां नद्याम् इति खण्डवाक्यम्, तद्बोध्यः अर्थः = गभीरत्वविशिष्टनदीवृत्तित्वरूपः, तादृशस्य वाक्यार्थस्य सामीप्यसम्बन्धरूपा लक्षणा गभीरनदीतीरवृत्तित्वरूपे । एवञ्च तादृशवाक्यात् गभीरनदीतीरवृत्तिर्घोषः इति बोधः। अत्र नैयायिकैः गभीरायां नद्यां घोषः इति वाक्ये नदीपदस्य एव गभीरनदीतीरे लक्षणा, गभीरपदन्तत्र तात्पर्य्यग्राहकमेवेति उच्यते, तन्न विनिगमनाविरहात्[3] अर्थात् नदीपदस्य लक्षणायां गभीरपदस्य तात्पर्य्यग्राहकत्वम्, गभीरपदस्य लक्षणायां नदीपदस्य तात्पर्य्यग्राहकत्वं वेत्यन्यतरपक्षे प्रमाणाभावात् । परं पदे लक्षणां स्वीकृत्य वाञ्छितार्थो न लभ्यत इति मीमांसकाः। अत्र गभीरनदीपदयोः सप्तम्यन्तत्वात् समानविभक्तिकत्वात् नामार्थयोः अभेदसम्बन्धेनैवान्वयः, यथा नीलो घटः इत्यत्र नीलाभिन्नो घटः। अत्र यद्यत्र पदे लक्षणा मन्यते तदा अभेदान्वयेन निम्नलिखितोऽनन्वितो बोधोऽऽपद्येत –

**1. गभीरपदे लक्षणायाम्** – (गभीर)तीराभिन्ना नदी तत्र घोषः इति बोधः स्यात् । स च असङ्गतः, तीरं नदी न भवति । तीरेण नदी भिन्ना एवास्ति, न त्वभिन्ना । नद्यामित्यनेन पदार्थेन लक्ष्यार्थस्य तीरस्य अभेदसम्बन्धेनान्वेतुं योग्यताऽभावात् अन्वयाभावरूपदोषापत्तिः[4]।

**2. नदीपदे लक्षणायाम्** – गभीराभिन्नं (नदी)तीरम्, तत्र घोष इति बोधः। नहि तीरं गभीरं भवति, अपितु नदी गभीरा भवति। अतः गभीरपदार्थस्य तीरपदार्थे अन्वयापत्तिः[5]।

**3. प्रत्येकं पदद्वये तीरे लक्षणायाम्** – गभीरतीराभिन्नं यन्नदीतीरं तत्र घोषः इति बोध इत्यप्यनुचितः। यतो हि विशिष्टनदीबोधस्यानापत्तिः स्यादर्थात् गभीराभिन्ना या नदी तत्तीरे घोषः इति गभीरपदार्थेन अभेदेनान्वितस्य नदीपदार्थस्य बोधो न स्यात्[6] । गभीरायां नद्यामिति वाक्यात् गभीरत्वविशिष्टनदीबोध एव इष्टः, स च एकस्योभयस्य वा पदस्य लक्षणायां न सम्भवः।

उपर्य्युक्ताभिरापत्तिभिः 'गभीरायां नद्याम्' इत्यादिखण्डवाक्येन गभीरत्वविशिष्टनदीपदार्थो बोध्यते, तस्य सामीप्यसम्बन्धः लक्षणेति मीमांसकमतम् ।

**(1.3) शाब्दिकमते लक्षणा**

---

[2] शक्तं पदम्

[3] अन्यतरपक्षपातिनी युक्तिः विनिगमना(प्रमाणविशेषः), तस्याः विरहः अर्थात् अभावः।

[4] न तावद् गभीरपदं तीरलक्षकं, नद्यानित्यनन्वयापत्तेरिति, प०ल०म० पृ०स०-269, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[5] अत एव न नदीपदेऽपि, गभीरपदार्थानन्वयादिति, प०ल०म० पृ०स०-269, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[6] न च प्रत्येकं पदद्वये सा, विशिष्टनदीबोधानापत्तेरिति, प०ल०म० पृ०स०-269, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

वैयाकरणैः अतिरिक्तवृत्तिरूपा लक्षणा न स्वीक्रियते। एतैस्तु शक्यतावच्छेदकारोप एव लक्षणा इति मन्यते। शक्यावच्छेदकारोप इत्यत्र शक्यः अर्थात् शक्त्या उपस्थापितः अर्थः, शक्यता शक्ये तिष्ठति, तस्याः अवच्छेदकः गङ्गात्वकाकत्वादिः, तस्याऽऽरोपः एव लक्षणा। यथा तीरे गङ्गात्वारोपः, दध्युपघातकमात्रे च काकत्वारोपः। तेन च तीरादीनां गङ्गादिना बोधो जायते। एवञ्च शक्त्या एव लक्ष्यार्थबोधसत्त्वे तदर्थं पुनः अतिरिक्ततया लक्षणावृत्तेः स्वीकारः अनावश्यक एव।

**2. लक्षणाबीजम्**

लक्षणायाः बीजं किमिति शङ्कायां मतद्वयं प्रसिद्धम् –

- मीमांसकाः – अन्वयानुपपत्तिप्रतिसम्धानं लक्षणाबीजम्।
- नैयायिकशाब्दिकाश्च – तात्पर्य्यानुपपत्तिप्रतिसन्धानं लक्षणाबीजम्।

**(2.1) मीमांसकमतम्**

'अन्वयानुपपत्तिप्रतिसन्धानमे'व लक्षणायाः बीजमिति मीमांसकैः स्वीक्रियते। यतो हि वक्तुरिच्छा तात्पर्य्यम्। वेदस्य अपौरुषेयत्वात् कश्चिद् वक्ता एव नास्ति। अतः मीमांसकाः अन्वयानुपपत्तिरेव लक्षणाबीजम्, तात्पर्य्यानुपपत्तेः लक्षणाबीजत्वस्वीकारे वेदे तात्पर्य्याभावाद् वेदार्थबोधो न स्यादिति वदन्ति। एवञ्च 'गङ्गायां घोषः' इत्यत्र गङ्गापदात् जलप्रवाहरूपः, घोषपदाच्च आभीरपल्लीरूपः शक्यार्थौ उपस्थितौ, तयोः शक्यार्थयोः जलप्रवाहाभीरपल्ल्योः परस्परमनन्वयः, आभीरपल्ल्याः जलप्रवाहे आधारत्वायोग्यत्वादन्वयानुपपत्तिज्ञानं = आभीरपल्ली न जलप्रवाहवृत्तिरिति ज्ञानम्, ततश्च वाक्यार्थबोधाभावः। वाक्यार्थबोधाय च शक्यार्थजलप्रवाहस्य तीरेण सह स्वशक्यसम्बन्धरूपसामीप्यसम्बन्धज्ञानं, तेन तीरस्योपस्थितिर्भवति। तस्मिन् उपस्थिते तीरे आभीरपल्ल्याः अन्वययोग्यतासत्त्वात्, गङ्गातीरे घोषः इति शाब्दबोधो जायते। तथाहि लक्षणायां क्रमः – प्रथमं शक्यार्थज्ञानम्, ततः अन्वयबाधः, ततः वाक्यार्थबोधाभावः, ततः शक्यार्थसम्बन्धानुसन्धानम्, ततः लक्ष्यार्थतीरस्य बोधः।

**(2.2) नैयायिकमतम्**

वस्तुतः 'तात्पर्यानुपपत्तिप्रतिसन्धानमे'व लक्षणाबीजम्। अन्वयानुपपत्तिप्रतिसन्धानस्य बीजत्वे तु 'गङ्गायां घोषः' इत्यादौ गङ्गापदार्थादेः तीराद्यर्थेष्विव घोषादिपदार्थादेः मकराद्यर्थेषु लक्षणापत्तिः। यतो हि एतादृश लक्षणयाऽपि अन्वयानुपपत्तेः परिहारः सम्भवति। अपि च 'गङ्गायां पापी गच्छती'त्यादौ गङ्गापदस्य नरके लक्षणया पापिनः गङ्गायाम् अर्थात् नरकेऽन्वयोपपत्तिः स्यात्। किन्तु तात्पर्य्यानुपपत्तेः बीजत्वेन स्वीकारे पापिपदस्य भूतपूर्वपापयुक्ते लक्षकत्वे न गङ्गापदस्य नरकार्थरूपदोषः स्यात्। कथन्तु एतद्वाक्यप्रयोगे पूर्वजन्मनि कृतं पापमपनेतुं जनः स्नानाय गङ्गायां गच्छतीति तात्पर्य्यमस्ति। अस्यार्थस्य लाभोऽन्वयानुपपत्तिबीजेन गङ्गापदस्य नरके लक्षणायां न सम्भवः। अपि च, लक्षत्रं दृष्ट्वा वाचं विसृजेदित्यत्रान्वये सुलभे अन्वयानुपपत्तिरूपं बीजं नास्ति, तथापि लक्षणा सर्वैः स्वीक्रियते। तात्पर्य्यानुपपत्तिबीजग्रहणादेव रात्रिकाले मौनमाचरेदिति तात्पर्य्यम्। अतः नक्षत्रस्य शक्यार्थेन तात्पर्य्यानुपपत्त्या लक्षत्रपदस्य नक्षत्रदर्शनयोग्यकाले लक्षणा क्रियते। एवं सर्वत्र तात्पर्य्यानुपपत्त्या एकस्यानुगमकस्य स्वीकारेणैव निर्वाहसम्भवेऽन्वयाद्यनुपपत्तिप्रतिसन्धानस्यावश्यकता नास्ति। मीमांसकमतेऽपि वक्तुरभावादपि वेदे मन्त्राणां प्रकरणादिना तात्पर्य्यग्रहसम्भवाद्वक्तुरनपेक्षया लक्षणा सम्भवैव।

**(2.3) शाब्दिकमतम्**

शाब्दिकमतेऽपि 'तात्पर्यानुपपत्तिप्रतिसन्धानमे'व लक्षणायाः ज्ञापकं वर्त्तते। अस्य निरूपणं पूर्वमेव कृतम्।

**3. लक्षणाभेदाः**

शक्यसम्बन्धरूपायाः लक्षणायाः नानाभेदाः[7] सन्ति । यथा - गौणीलक्षणा-शुद्धालक्षणा-अजहत्स्वार्था-जहत्स्वार्था-जहदजल्लक्षणा-लक्षितलक्षणा-निरूढलक्षणा-प्रयोजनवती-स्वारसिकलक्षणा चेत्यादयः ।

**गौणीलक्षणा** - गुणात् आगता गौणी लक्षणा । शक्यार्थस्य क्रौर्य्यजाड्यमान्द्यादिगुणरूपं यत् सादृश्यं तद्रूपः सम्बन्धो गौणी लक्षणा । तदेवोक्तं मञ्जूषायाम् – स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी[8] । अस्य समन्वयस्तु – स्वः = पदशक्यः, तेन निरूपितं = सम्बन्धि, यत् सादृश्यम् = सदृशे विद्यमानं क्रौर्य्यादिरूपम्, तस्याधिकरणत्वसम्बन्धेन = अनुयोगित्वसम्बन्धेन (सादृश्यं यत्र तिष्ठति, तत् सादृश्याधिकरणं सादृश्यानुयोगि वेति कथ्यते) शक्यसम्बद्धार्थः तत्प्रतिपादिका गौणीलक्षणा वर्त्तते । एवञ्च शक्यार्थसम्बन्धिक्रौर्य्यादिगुणरूपसादृश्या-नुयोगित्वसम्बन्धेन शक्यार्थसम्बद्धार्थप्रतिपादिका गौणी कथ्यते । यथा सिंहो माणवकः इत्यत्र सिंहपदशक्यः केसरी, तत्क्रौर्य्यरूपसादृश्यानुयोगित्वं माणवके विज्ञाय सिंहपदस्य शक्यार्थसम्बद्धोऽर्थः सिंहसादृश्यविशिष्टः सिंहसदृशः अर्थः, तस्य प्रतिपादिका गौणी । अत्र सिंहे माणवके च विद्यमानो यः सादृश्यसम्बन्धः (गौणीलक्षणारूपः) सः सम्बद्धस्य सिंहसदृशस्यार्थस्य प्रतिपादको विद्यते ।

**शुद्धालक्षणा** – सादृश्यसम्बन्धातिरिक्तसामीप्यादिसम्बन्धेन शक्यसम्बद्धार्थप्रतिपादिका शुद्धा[9] । यथा – 'गङ्गायां घोष' इत्यत्र गङ्गापदशक्यार्थभगीरथरथखातावच्छिन्नजलप्रवाहसामीप्यानुगोत्वं तीरे विज्ञाय गङ्गासामीप्यविशिष्टस्य तीरस्यार्थस्य प्रतिपादिका शुद्धालक्षणा ।

तथाहि सादृश्यसम्बन्धेन शक्यसम्बद्धार्थप्रतिपादिका गौणी, सामीप्यादिसम्बन्धेन शक्यसम्बद्धार्थप्रतिपादिका शुद्धा लक्षणेति पर्य्यवस्यति ।

**जहत्स्वार्था** – जहति = परित्यजन्ति स्वानि = पदानि यम् = अर्थम्, सः जहत्स्वः। जहत्स्वः (पदकर्त्तृकत्याग-कर्मीभूतः) अर्थो यस्यां लक्षणायां सा जहत्स्वार्था लक्षणा । तदेवोक्तं मञ्जूषायाम् – स्वार्थपरित्यागेनेतरार्थाभिधायिका-ऽन्त्येति[10] । स्वार्थः = शक्यार्थः, तस्य परित्यागेन = शक्यार्थस्य लक्ष्यार्थान्वयिना अनन्वयित्वेन इतरार्थस्य = अन्यार्थस्य, प्रतिपादिका जहत्स्वार्था लक्षणा । यथा गां वाहीकं पाठय इत्यत्र शक्यार्थस्य = सास्नादिमतः गोपदार्थस्य, लक्ष्यार्थगोसदृशवाहीकस्य, अन्वयिना = पाठनेन, अनन्वयित्वात् = अन्वयाभावात्, तथा च स्वार्थत्यागात् इतरार्थस्य = गोसदृशस्य प्रतिपादिकात्वात् जहत्स्वार्था । अत्र गोः वाहीकस्य च जाड्यमान्द्यादिरूपः सादृश्यसम्बन्धः। वाहीके गोगतजाड्यमान्द्यादिप्रतीतिः प्रयोजनम् ।

**अजहत्स्वार्था** – न जहत्स्वार्था अजहत्स्वार्थेति । उक्तञ्च मञ्जूषायाम् – स्वार्थसंवलितपरार्थाभिधायिका-ऽजहत्स्वार्थेति ।[11] शक्यार्थेन सहितः यो लक्ष्यार्थः, तस्य प्रतिपादिकाऽजहत्स्वार्था लक्षणा । एवञ्च शक्यार्थस्याऽपरि-त्यागेन यत्र शक्यसम्बन्धिनोऽन्यस्याऽर्थस्य बोधः, तत्राऽजहत्स्वार्था लक्षणोच्यते । शक्यार्थस्याऽपरित्यागोऽर्थात् शक्यार्थस्य लक्ष्यार्थस्य चोभयसाधारणेन केनचित् रूपेण लक्ष्यार्थस्य सम्बन्धिना सम्बन्धः। यथा – छत्रिणो यान्तीत्यत्र शक्यार्थः = छत्रीति, लक्ष्यार्थः = छत्र्यच्छत्रिसमुदायः सेनारूपस्तयोः एकसार्थवाहित्वं = एकसाहचर्य्यं सम्बन्धः, असौ सम्बन्ध एवाऽजहत्स्वार्था लक्षणा । एवञ्च छत्र्यच्छत्रिसमुदाये नाम उभयविधसेनार्थे छत्रिपदस्य लक्षणा । एवमेव कुन्तान् प्रवेशय इत्यत्र कुन्तधारिणः कुन्तनिष्ठतीक्ष्णतया प्रवेशयेत्यर्थः। एवञ्च यष्टीः प्रवेशय इत्यत्र यष्टिसंयुक्तपुरुषान् प्रवेशयेत्यर्थः। तथा च काकेभ्यो दधि रक्ष्यतामित्यत्र काकसहितसर्वदध्युपघातकेभ्यः दधि रक्ष्यतामित्यर्थः।

**जहदजहल्लक्षणा** – वेदान्तिनः जहदजहल्लक्षणा इति लक्षणायास्तृतीयं भेदमपि स्वीकुर्वन्ति । विशिष्टार्थबोधके शब्दे यदि विशिष्टार्थस्य एकस्मिन्नंशे लक्षणा क्रियते, तदा जहदजहल्लक्षणा[12] भवति । यथा विशिष्टार्थबोधकः ग्रामशब्दः, पटशब्दश्च । ग्रामशब्दस्य शालासमुदायः, पटशब्दस्य च तन्तुसमूहः विशिष्टार्थः। तस्य विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशेऽर्थात् ग्रामावयवे कतिपयशालासमुदाये, एवमेव पटावयवे कतिपयतन्तुसमूहे लक्षणायां ग्रामैकदेशे दग्धे ग्रामो दग्धः, पटैकदेशे च दग्धे पटो दग्ध इति व्यवह्रयते । तथा च याः शालाः दग्धाः, याश्चाऽदग्धाः तत्र स्वार्थग्रहणं स्वार्थपरित्यागश्च क्रियते । इयं वेदेऽपि प्रसिद्धा । छान्दोग्योपनिषदि 'तत्त्वमसि' इति वाक्ये तत्पदे त्वम्पदे च जहदजल्लक्षणा वर्त्तते । अत्र तत्पदं त्वम्पदञ्च विशिष्टार्थबोधकम् । तत्पदस्य विशिष्टार्थः = सर्वज्ञत्वादिविशिष्टं चैतन्यम्, त्वम्पदस्य च विशिष्टार्थः = अल्पज्ञत्वादिविशिष्टं चैतन्यमिति । अत्र पदार्थैकदेशः = चैतन्यम्, तस्मिन् चैतन्यरूपे पदार्थैकदेशे लक्षणा क्रियते । तथाहि विशिष्टार्थे 'सर्वज्ञत्वादि' 'अल्पज्ञत्वादि' इति किञ्चिदंशः

---

[7] साहित्यदर्पणे लक्षाणायाः षोडशभेदाः उक्ताः, उदाहृताश्च । तत्र शुद्धाया अष्टौ, गौण्यास्तावन्त एवेति अष्टद्वैगुण्यात् षोडशेति ।

[8] प०ल०म० पृ०स०-255, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[9] तदतिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा, प०ल०म० पृ०स०-255, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[10] प०ल०म० पृ०स०-255, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[11] प०ल०म० पृ०स०-255, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[12] वाच्यार्थे किञ्चिदंशत्यागः किञ्चिदंशपरिग्रहश्चेति, प०ल०म० पृ०स०-265, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

परित्यज्यते, चैतन्यमिति किञ्चिदंशश्च गृह्यते। अनया लक्षणया च 'तत्त्वमसि' इति वाक्येन जीवब्रह्मणोः अभेदसम्बन्धः अर्थात् ऐक्यं प्रतिपाद्यते। इयं जहदजहल्लक्षणा पदार्थस्यैकभागे भवत्यतः 'भागलक्षणा'ऽप्युच्यते।

**निरूढलक्षणा** – प्रयोजनाभावे अर्थात् अर्थविशेषप्रतीत्यभावे शक्यार्थस्य लक्ष्यार्थेन सह यः सम्बन्धः, सः निरूढलक्षणेति। यथा त्वचा ज्ञातम् इत्यादिलाक्षणिकप्रयोगे ज्ञातम् इति पदस्य समीपोच्चारणात् त्वक्छब्दस्य ज्ञानसाधने त्वगिन्द्रिये निरूढलक्षणा। अत्र शक्यार्थस्य चर्म्मरूपस्य ज्ञानसाधनत्वे बाधात्। तदेवं बाधज्ञानपूर्वकः यदि इन्द्रियार्थलाभः, तदा त्वचा ज्ञातमित्यत्र इन्द्रियार्थे निरूढलक्षणा। यदि प्रसिद्ध्यैव त्वक्पदेन त्वगिन्द्रियबोधः, तदा इन्द्रिये रूढशक्तिः एव, रूढिरर्थात् प्रसिद्धिः। इयं निरूढलक्षणा, रूढिशक्तिश्च साम्यार्थमेव बोधयति, अतः पर्य्यायत्वं[13] द्वयोः। एवञ्च सति बाधज्ञाने निरूढलक्षणा, असति बाधज्ञाने च रूढिशक्तिः इति विशेषः।

**प्रयोजनवती** – यस्यां लक्षणायाञ्च किमपि प्रयोजनं विशेषार्थप्रतिपत्तिरूपं फलं भवति, सा प्रयोजनवती लक्षणेति। यथा – गङ्गायां घोषः इत्यत्र तटे गङ्गास्थितशैत्यपावनत्वादिबोधः प्रयोजनम्। एतादृशश्च बोधः गङ्गातीरे घोष इति वाक्येनालभ्यः, तादृशबोधलाभाय लक्षणाऽत्र प्रयोजनवती। गोः वाहीकेऽभेदप्रत्ययः प्रयोजनम्। गोसदृशो वाहीक इत्यर्थः। कुन्ताः प्रविशन्त्यत्र भयात् आत्मपरित्राणार्थं पलायमानस्य जनस्य आत्मीयान् प्रति कथनमिदम्। अत्र कुन्ताः इत्यस्य कुन्तसंयुक्ताः इत्यर्थो लक्षणा बुध्यते। कुन्तगततैक्ष्ण्यस्य (आशुतया प्राणघातकत्वस्य) कुन्तसंयुक्तपुरुषे प्रतीतिरेवात्र प्रयोजनम्। एताः प्रयोजनरूपाः प्रतीतयः व्यञ्जनावृत्त्या, लक्षणावृत्त्या तु लक्ष्यार्थमात्रस्य तीरादिरेव बुद्ध्यते।

**लक्षितलक्षणा** - शक्यार्थस्य परम्परासम्बन्धो लक्षितलक्षणेति नैयायिकाः। द्विरेफौ रौतीत्यत्र परम्परासम्बन्धेन स्वशक्यघटितपदवाच्यत्वसम्बन्धेन द्विरेफपदस्य भ्रमरे लक्षणया भ्रमरो रौतीति बोधो जायते। तथाहि स्वं द्विरेफपदम्, तस्य शक्यं रेफद्वयम्, तद्घटितं पदं भ्रमरपदम्, तद्वाच्यत्वं भ्रमरे इति परम्परासम्बन्धोऽत्र निर्वहति। इदमेवोच्यते – द्विरेफपदस्य स्वलक्ष्यभ्रमरशब्दवाच्यार्थे लक्षणा भवति। स्वं द्विरेफपदम्, तस्य लक्ष्योऽर्थात् लक्षणया बोधितो यो भ्रमरशब्दस्तस्य (लक्षितस्य) वाच्यार्थे जन्तुविशेषे लक्षणायां सत्यां लक्षितलक्षणा (लक्षितस्य लक्षणा) इति तार्किकैः व्यवह्रियते। तथाह्यत्र लक्षणाद्वयी। द्विरेफपदस्य लक्षणा भ्रमरपदे, लक्षितस्य भ्रमरपदस्य च लक्षणा भ्रमरेऽर्थे इति बोद्ध्यम्। अत्र लक्षकस्य द्विरेफस्य, लक्ष्यार्थस्य भ्रमरस्य च मध्ये कीदृशः सम्बन्धः (लक्षणा) इति जिज्ञासायां मूले उच्यते – 'स्वबोध्यपदवाच्यत्वं सम्बन्धः'[14] इति। स्वबोध्यपदम् अर्थात् स्वशक्यघटितपदम्। स्वं द्विरेफपदम्, तस्य शक्यं रेफद्वयम्, तद्बोध्यम् अर्थात् तद्घटितं भ्रमरपदम्, तद्वाच्यत्वं भ्रमररूपेऽर्थे विद्यते।

**(3.1) परिशीलनम्**

लक्षणायाः इमान् भेदान् एवं विभक्तुं शक्यते –

| | |
|---|---|
| **सम्बन्धदृष्ट्या** | 1. गौणी लक्षणा – सिंहो माणवकः। |
| | 2. शुद्धा लक्षणा – गङ्गायां घोषः। |
| **शक्यार्थन्वयदृष्ट्या** | 3. अजहत्स्वार्था लक्षणा – छत्रिणो यान्ति। |
| | 4. जहत्स्वार्था लक्षणा – गां पाठय। |
| | 5. जहदजहल्लक्षणा – ग्रामो दग्धः। |

[13] इयं तु शक्यपरपर्य्यायैवेति बोध्यमिति, प०ल०म० पृ०स०-275, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[14] प०ल०म० पृ०स०-271, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

| | |
|---|---|
| **प्रयोजनदृष्ट्या** | 6. निरूढलक्षणा – त्वचा ज्ञातम्। |
| | 7. प्रयोजनवती लक्षणा – गौर्वाहीकः। |
| **लक्षितपदेन लक्ष्यार्थबोधात्** | 8. लक्षितलक्षणा – द्विरेफः। |
| **सम्बन्धपञ्चकमाधृत्य** | 9. तात्स्थ्यलक्षणा – मञ्चा हसन्ति। |
| | 10. ताद्धर्म्यलक्षणा – सिंहो माणवकः। |
| | 11. तत्सामीप्यलक्षणा – गङ्गायां घोषः। |
| | 12. तत्साहचर्य्यलक्षणा – यष्टीः प्रवेशय। |
| | 13. तादर्थ्यलक्षणा – स्थूणा इन्द्रः। |

**4. लक्षणायाः निमित्तानि**

अर्थविशेषे शक्यसम्बन्धात्मिका लक्षणा तात्स्थ्य-ताद्धर्म्य-तत्सामीप्य-तत्साहचर्य्य-तादर्थ्यरूपकारणैः पञ्चविधा, अत्र सर्वत्र तत्पदेन शक्यार्थो गृह्यते। तदेवोक्तं भट्टनागेशेन मञ्जूषायाम् – सा च लक्षणा तात्स्थ्यादिनिमित्तिका। तदाह –

तात्स्थ्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च।
तत्साहचर्य्यात्तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः॥ इति[15]।

**तात्स्थ्यात्** - तात्स्थ्यारूपनिमित्तात् जायमानलक्षणायाः उदाहरणम् – मञ्चाः हसन्ति, ग्रामः पलायिताः। अत्र मञ्चस्थत्वनिमित्तेन मञ्चपदस्य मञ्चस्थेषु बालकेषु लक्षणया मञ्चस्थाः बालकाः हसन्तीति बोधः। तथैव ग्रामस्थत्वनिमित्तेन ग्रामपदस्य ग्रामस्थे लक्षणया ग्रामस्थो जनः पलायित इति बोधः।

**ताद्धर्म्यात्** – ताद्धर्म्यरूपहेतोरुदाहरणम् – सिंहो माणवकः, गौर्वाहीकश्चेति। अत्र सिंहवृत्तिशौर्य्यादिधर्म्मस्य माणवके, गोवृत्तिजाड्यमान्द्यादिधर्म्मस्य च वाहीके विद्यमानत्वात् सिंहपदं सिंहसदृशस्यार्थात् सिंहवृत्तिशौर्य्यादिमान् इत्यस्य, गोपदञ्च गोसदृशस्याऽर्थात् गोवृत्तिजाड्यमान्द्यादिमान् इत्यस्य बोधको लक्षणया।

**तत्सामीप्यात्** – तत्सामीप्यहेतोरुदाहरणम् – गङ्गायां घोष इति। अत्र गङ्गापदं सामीप्यसम्बन्धेन तीरस्य बोधकम्।

**तत्साहचर्य्यात्** – तत्साहचर्य्यस्योदाहरणम् – यष्टीः प्रवेशय इति। अत्र यष्टिपदं साहचर्य्यसम्बन्धेन यष्टिधरस्य बोधकम्।

**तादर्थ्यात्** – तादर्थ्यस्योदाहरणम् – इन्द्रार्था स्थूणा इन्द्र इति। इन्द्रस्य कृते इन्द्रमुद्दिश्य यागाय पशुबन्धनकृते या स्थूणा यज्ञस्य स्तम्भः सः इन्द्रः अर्थात् इन्द्रोपकारको भवति। अत्र इन्द्रपदस्य इन्द्रोपकारके लक्षणा, उपकारकत्वात्। तेन इन्द्रार्था स्थूणा इन्द्रोपकारिकेत्यर्थः।

**5. लक्षणाखण्डनम्**

वैयाकरणमते वृत्तिर्द्विधा – शक्तिव्यञ्जनान्यतररूपैव। लक्षणा तु हेतुत्रयात् न स्वीक्रियते, ते – लक्षणायाः अभावे भाष्यप्रामाण्यम्, गौरवम्, अन्याय्यत्वञ्च। **लक्षणायाः अभावे भाष्यप्रामाण्यात्**– भाष्य उक्तम् – 'सति तात्पर्य्ये सर्वे सर्वार्थवाचकाः' इति। यदि वक्तुः तात्पर्य्यं भवेत्, तर्हि

[15] प०ल०म० पृ०स०-260, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

सर्वे वाचकाः (शक्ताः) शब्दाः सर्वार्थस्य शक्यार्थस्य लक्ष्यार्थस्य च बोधकाः भवन्तीति, एतेन भाष्येण लक्षणायाः अभावः सूच्यते, शक्तस्यैव लक्ष्यार्थस्याऽपि बोधकत्वात् । **गौरवात्** – लक्षणास्वीकारे शाब्दबोधं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम् । तथा च कार्यकारणभावद्वयस्य कल्पने गौरवं स्यात् । तथा च लक्षणायाः स्वीकारे च तदर्थविषयकशाब्दबोधं प्रति तदर्थनिरूपिततत्पदनिष्ठलक्षणाज्ञानं तदधीनतदर्थोपस्थितिश्च कारणमित्यतिरिक्तकार्य्यकारणभावः कल्पनीय इति गौरवम् । एवञ्च शक्तिज्ञानाधीनोपस्थितिनिष्ठकारणतायाः अवच्छेदिका वृत्तिः शक्तिः, लक्षणाज्ञानाधीनोपस्थितिनिष्ठ-कारणतायाः अवच्छेदिका वृत्तिः लक्षणेति, अतः वृत्तिद्वये अर्थात् शक्तिवृत्तौ लक्षणावृत्तौ चोपस्थितिनिष्ठकारणता-वच्छेदकत्वद्वयस्य कल्पनापत्त्या गौरवम् । **अन्याय्यत्वात्** – 'गङ्गायां घोषः' इत्यादौ पूर्वोपस्थितत्वात् अन्तरङ्गस्य, लघुस्वरूपस्य च शक्तिरूपसम्बन्धस्य वृत्तित्वकल्पनापेक्षया पश्चादुपस्थितायाः बहिरङ्गायाः, गुरुभूतायाः (शक्तिसम्बन्धघटितसम्बन्धस्य) शक्यसम्बन्धरूपायाः लक्षणायाः वृत्तित्वकल्पनायाः अनुचितत्वम् ।

लक्षणायाः अस्वीकारे 'गङ्गायां घोषः' इत्यादौ गङ्गादिपदात् लक्ष्यार्थस्य तीरादेः भानन्तु 'सति तात्पर्य्ये सर्वे सर्वार्थवाचकाः' इति भाष्याशयात् गङ्गादिपदात् शक्त्या एव तीरादिः बोध्यते । एवञ्च गङ्गादिपदे विलक्षणजलप्रवाहादिनिरूपिता, तीरादिनिरूपिता च शक्तिः तिष्ठति । यत्र यादृशं तात्पर्य्यं तत्र तादृशार्थस्य बोधः। तथा च शक्तिर्द्विविधा – प्रसिद्धा शक्तिः, अप्रसिद्धा शक्तिश्चेति ।

**प्रसिद्धा शक्तिः** – 'आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्'[16] । मन्दान् आरभ्य तीक्ष्णं यावत् सर्वेषां बुद्धिद्वारा यस्यां शक्तौ वेद्यात्वं ज्ञेयता भवति, सा प्रसिद्धा शक्तिरुच्यते ।

**अप्रसिद्धा शक्तिः** – 'सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्'[17] । सहृदयानां बुद्ध्या एव वेद्यात्वं यत्र शक्तौ, सा अप्रसिद्धा शक्तिः कथ्यते । तदेवं विदुषां कृते एव गङ्गादिपदात् तीरादिलक्ष्यार्थबोधः शक्त्या जायते इति भावः। तथाहि लक्षणया यो बोधस्तस्य शक्त्यैव सम्भवे लक्षणायाः अस्वीकारे न कोऽप्यनुपपत्तिविषयः।

ननु 'सर्वे सर्वार्थवाचकाः' इति भाष्यवचनानुसारं घटपदात् पटपदार्थस्याऽपि ज्ञानं भवतीति न शङ्क्यम्, तात्पर्य्ये सत्येव सर्वे शब्दाः सर्वेषाम् अर्थानां वाचकाः भवन्तीति भाष्यकारवचनम् । तथा च घटशब्दे पटपदार्थतात्पर्य्याभावात् न घटात् पटबोधः। वक्तुरिच्छायास्तात्पर्य्येण वक्तॄणां वैविध्यात् गौरवापत्त्याऽत्र ईश्वरकृतं तात्पर्य्यं गृह्यते । ईश्वरकृतस्य तात्पर्य्यस्यास्मदादीनां लाभस्तु देवतानां, महर्षीणां, लोके वृद्धानाञ्च परम्परया सततव्यवहारेण ऐश्वरस्य तात्पर्य्यस्य लब्धुं शक्यत्वात् ।

**5. निष्कर्षः**

वृत्तिस्त्रिधा शक्तिलक्षणाव्यञ्जनाश्च । अत्र साहित्यिकाः, नैयायिकाः, मीमांसकाः, वेदान्तिनश्च लक्षणां स्वीकुर्वन्ति, किन्तु वैयाकरणैः लक्षणा न स्वीक्रियते । एतैस्तु 'शक्यतावच्छेदकारोप एव लक्षणा' इति मन्यते । शक्यावच्छेदकारोप इत्यत्र शक्यः अर्थात् शक्त्या उपस्थापितः अर्थः, शक्यता शक्ये तिष्ठति, तस्याः अवच्छेदकः गङ्गात्वकाकत्वादिः, तस्याऽऽरोपः एव लक्षणा । यथा तीरे गङ्गात्वारोपः, दध्युपघातकमात्रे च काकत्वारोपः। तेन च तीरादीनां गङ्गादिना बोधो जायते । एवञ्च शक्त्या एव लक्ष्यार्थबोधसत्त्वे तदर्थं पुनः अतिरिक्ततया लक्षणावृत्तेः स्वीकारः अनावश्यक एव । एवञ्च लक्षणायाः अभावे भाष्यप्रामाण्यात्, गौरवात्, अन्याय्यत्वाच्च वृत्त्यान्यतमत्वेन लक्षणा न स्वीकरणीया । अस्याः अभावे भाष्यप्रामाण्यन्तु 'सति तात्पर्य्ये सर्वे सर्वार्थवाचकाः' इति वचनम्, अनेन लक्षणाभावेऽपि गङ्गापदेन तीरबोधो जायते । अत्र 'सति तात्पर्य्ये' इत्युक्तत्वात् वक्तुः तात्पर्य्ये सत्येव तदर्थः बुद्ध्यते, तस्मात् सर्वैः शब्दैः निखिलार्थाः न ज्ञायन्ते । अत्र भट्टपादस्तु शक्तेर्द्वैविध्यं मत्वा लक्षणायाः खण्डनं प्रदर्शितम् । तथा च शक्तिर्द्विधा प्रसिद्धाऽप्रसिद्धा च । तत्र मन्दान् आरभ्य तीक्ष्णं यावत् सर्वेषां बुद्धिद्वारा यस्यां शक्तौ वेद्यात्वं भवति, सा प्रसिद्धा शक्तिः, एवं सहृदयानां प्रशस्तमानसां बुद्ध्या एव वेद्यात्वं यत्र शक्तौ, सा अप्रसिद्धा शक्तिरिति कथ्यते । अस्याः लक्षणायाः मूलन्तु 'तात्पर्यानुपपत्तिप्रतिसन्धानमे'व ।

[16] प०ल०म० पृ०स०-283, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

[17] प०ल०म० पृ०स०-283, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

अन्वयानुपपत्तिप्रतिसन्धानस्य बीजत्वे तु 'गङ्गायां घोषः' इत्यादौ गङ्गापदार्थादेः तीराद्यर्थेष्विव घोषादिपदार्थादेः मकराद्यर्थेषु लक्षणापत्तिः स्यात्, एतादृश लक्षणयाऽपि अन्वयानुपपत्तेः परिहारसम्भवात्।

**सहायकग्रन्थसूची**


**1.** साहित्यदर्पणः, श्रीविश्वनाथाचार्य्यः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, 2013

**2.** काव्यप्रकाशः, श्रीमम्मटाचार्यः, सम्पादकः - डा॰ नरेन्द्रः, ज्ञानमण्डललिमिटेड, वाराणसी, षष्ठसंस्करणम्, 2010

**3.** प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, प्रथमसंस्करणम्, 2003

**4.** मीमांसायां काव्यशास्त्रे च शब्दशक्तिः, विरूपाक्ष वि॰ जड्डीपाल्, अमरग्रन्थपब्लिकेशन्स, दिल्ली, प्रथमसंस्करणम्, 2002

**5.** शब्दशक्तिप्रकाशिकासमीक्षणम्, डा॰ विष्णुपदमाहापात्रः, मान्यताप्रकाशनम्, मायापुरी, प्रथमसंस्करणम्, 2005

1. **6.** वैयाकरणानामन्येषाञ्च मतेन शब्दस्वरूपतच्छक्तिविचारः, डा॰ कालिकाप्रसादशुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, 2001

**6.** परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - प्रो॰ बोधकुमारझाः, हंसाप्रकाशन, जयपुर, प्रथमसंस्करणम्, 2018

**7.** परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - डा॰ जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011

**8.** तत्त्वचिन्तामणिः, श्रीगङ्गेशोपाध्यायः, सम्पादकः - श्रीमदुमेशमिश्रः, मिथिलाविद्यापीठः, प्रथमसंस्करणम्, 1957

**9.** शब्दशक्तिप्रकाशिका, श्रीजगदीशतर्कालङ्कारः, व्याख्याकारः - श्रीयोगगुरुचरणदेवशर्म्मा, कलिकाताविश्वविद्यालयः, कलिकाता, 1914

**10.** काव्यप्रकाशः, श्रीमम्मटाचार्य्यः, व्याख्याकारः - श्रीहरिशङ्करशर्म्मा, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, दशमसंस्करणम्, वि॰2060